# Mantra Matrika Pushpamala Stavah

# મન્ત્રમાતૃકાપુષ્પમાલાસ્તવઃ

## Document Information

Text title : mantra mAtRikA puShpamAlA stavaH Shri Parvati Manasa Stotram 08 28

File name : mantramAtRikApuShpamAlA.itx

Category : mAlAmantra, shankarAchArya, mantra, panchadashI

Location : doc_z_misc_shankara

Author : Shankaracharya

Transliterated by : V. Gopalakrishnan visgop at gmail.com, Aravind Krishnan

Proofread by : V. Gopalakrishnan visgop at gmail.com, Sridhar Seshagiri seshagir at engineering.sdsu.edu, Rajesh Thyagarajan

Description-comments : From stotrArNavaH 08-28

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2022

*sanskritdocuments.org*

# Mantra Matrika Pushpamala Stavah

# મન્ત્રમાતૃકાપુષ્પમાલાસ્તવઃ

પાર્વતીમાનસસ્તોત્રં ચ

શ્રીગણેશાય નમઃ ।

ૐ ક એ ઈ લ હ્રીં હ સ ક હ લ હ્રીં સ ક લ હ્રીં શ્રીં ।

કલ્લોલોલ્લસિતામૃતાબ્ધિલહરીમધ્યે વિરાજન્મણિ-
    દ્વીપે કલ્પકવાટિકાપરિવૃતે કાદમ્બવાટ્યુજ્જ્વલે ।
રત્નસ્તમ્ભસહસ્રનિર્મિતસભામધ્યે વિમાનોત્તમે
    ચિન્તારત્નવિનિર્મિતં જનનિ તે સિંહાસનં ભાવયે ॥ ૧॥

એણાઙ્કાનલભાનુમણ્ડલલસચ્છ્રીચક્રમધ્યે સ્થિતાં
    બાલાર્કદ્યુતિભાસુરાં કરતલૈઃ પાશાઙ્કુશૌ બિભ્રતીમ્ ।
ચાપં બાણમપિ પ્રસન્નવદનાં કૌસુમ્ભવસ્ત્રાન્વિતાં
    તાં ત્વાં ચન્દ્રકલાવતંસમકુટાં ચારુસ્મિતાં ભાવયે ॥ ૨॥

ઈશનાદિપદં શિવૈકફલદં રત્નાસનં તે શુભં (ફલકં)
    પાદ્યં કુઙ્કુમચન્દનાદિભરિતૈરર્ઘ્યં સરત્નાક્ષતૈઃ ।
શુદ્ધૈરાચમનીયકં તવ જલૈર્ભક્ત્યા મયા કલ્પિતં
    કારુણ્યામૃતવારિધે તદખિલં સન્તુષ્ટયે કલ્પતામ્ ॥ ૩॥

લક્ષ્યે યોગિજનસ્ય રક્ષિતજગજ્જાલે વિશાલેક્ષણે
    પ્રાલેયામ્બુપટીરકુઙ્કુમલસત્કર્પૂરમિશ્રોદકૈઃ ।
ગોક્ષીરૈરપિ નારિકેલસલિલૈઃ શુદ્ધોદકૈર્મન્ત્રિતૈઃ
    સ્નાનં દેવિ ધિયા મયૈતદખિલં સન્તુષ્ટયે કલ્પતામ્ ॥ ૪॥

હ્રીઙ્કારાઙ્કિતમન્ત્રલક્ષિતતનો હેમાચલાત્સઞ્ચિતૈઃ
    રત્નૈરુજ્જ્વલમુત્તરીયસહિતં કૌસુમ્ભવર્ણાંશુકમ્ ।
મુક્તાસન્તતિયજ્ઞસૂત્રમમલં સૌવર્ણતન્તૂત્ભવં
    દત્તં દેવિ ધિયા મયૈતદખિલં સન્તુષ્ટયે કલ્પતામ્ ॥ ૫॥

હંસૈરપ્યતિલોભનીયગમને હારાવલીમુજ્જ્વલાં

હિન્દોલદ્યુતિહીરપૂરિતતરે હેમાઙ્ગદેકઙ્કણે ।
મઞ્જીરૌ મણિકુણ્ડલે મકુટમપ્યર્ધેન્દુચૂડામણિં
નાસામૌક્તિકમઙ્ગુલીયકટકૌ કાઞ્ચીમપિ સ્વીકુરુ ॥ ૬॥

સર્વાઙ્ગે ઘનસારકુઙ્કુમઘનશ્રીગન્ધપઙ્કાઙ્કિતં
કસ્તૂરીતિલકઞ્ચ ફાલફલકે ગોરોચનાપત્રકમ્ ।
ગણ્ડાદર્શનમણ્ડલે નયનયોર્દિવ્યાઞ્જનં તેઽઞ્ચિતં
કણ્ઠાબ્જે મૃગનાભિપઙ્કમમલં ત્વત્પ્રીતયે કલ્પતામ્ ॥ ૭॥

કલ્હારોત્પલમલ્લિકામરુવકૈઃ સૌવર્ણપઙ્કેરુહૈ-
ર્જાતીચમ્પકમાલતીવકુલકૈર્મન્દારકુન્દાદિભિઃ ।
કેતક્યા કરવીરકૈર્બહુવિધૈઃ ક્લૃપ્તાઃ સ્રજો માલિકાઃ
સઙ્કલ્પેન સમર્પયામિ વરદે સન્તુષ્ટયે ગૃહ્યતામ્ ॥ ૮॥

હન્તારં મદનસ્ય નન્દયસિ યૈરઙ્ગૈરનઙ્ગોજ્જ્વલૈ-
ર્યૈર્ભૃઙ્ગાવલિનીલકુન્તલભરૈર્બધ્નાસિ તસ્યાશયમ્ ।
તાનીમાનિ તવામ્બ કોમલતરાણ્યામોદલીલા ગૃહા-
ણ્યામોદાય દશાઙ્ગગુગ્ગુલુઘૃતૈર્ધૂપૈરહં ધૂપયે ॥ ૯॥

લક્ષ્મીમુજ્જ્વલયામિ રત્નનિવહોત્ભાસ્વત્તરે મન્દિરે
માલારૂપવિલમ્બિતૈર્મણિમયસ્તમ્ભેષુ સમ્ભાવિતૈઃ ।
ચિત્રૈર્હાટકપુત્રિકાકરધૃતૈઃગવ્યૈર્ઘૃતૈર્વર્ધિતૈ-
ર્દિવ્યૈર્દીપગણૈર્ધિયા ગિરિસુતે સન્તુષ્ટયે કલ્પતામ્ ॥ ૧૦॥

હ્રીઙ્કારેશ્વરિ તપ્તહાટકકૃતૈઃ સ્થાલીસહસ્રૈર્ભૃતં
દિવ્યાન્નં ઘૃતસૂપશાકભરિતં ચિત્રાન્નભેદં તથા ।
દુગ્ધાન્નં મધુશર્કરાદધિયુતં માણિક્યપાત્રે સ્થિતં
માષાપૂપસહસ્રમમ્બ સફલં નૈવેદ્યમાવેદયે ॥ ૧૧॥

સચ્છાયૈર્વરકેતકીદલરુચા તામ્બૂલવલ્લીદલૈઃ
પૂગૈર્ભૂરિગુણૈઃ સુગન્ધિમધુરૈઃ કર્પૂરખણ્ડોજ્જ્વલૈઃ ।
મુક્તાચૂર્ણવિરાજિતૈર્બહુવિધૈર્વક્ત્રામ્બુજામોદનૈઃ
પૂર્ણા રત્નકલાચિકા તવ મુદે ન્યસ્તા પુરસ્તાદુમે ॥ ૧૨॥

કન્યાભિઃ કમનીયકાન્તિભિરલઙ્કારામલારાર્તિકા
પાત્રે મૌક્તિકચિત્રપઙ્ક્તિવિલસદ્કર્પૂરદીપાવલિઃ । (દીપાલિભિઃ)
ઉતત્તત્તાલમૃદઙ્ગગીતસહિતં નૃત્યત્પદામ્ભોરુહં

મન્ત્રારાધનપૂર્વકં સુવિહિતં નીરાજનં ગૃહ્યતામ્ ॥ ૧૩॥

લક્ષ્મીર્મૌક્તિકલક્ષકલ્પિતસિતચ્છત્રં તુ ધત્તે રસાદ્-
ઇન્દ્રાણી ચ રતિશ્ચ ચામરવરે ધત્તે સ્વયં ભારતી ।
વીણામેણવિલોચનાઃ સુમનસાં નૃત્યન્તિ તદ્રાગવ-
દ્ભાવૈરાઙ્ગિકસાત્ત્વિકૈઃ સ્ફુટરસં માતસ્તદાકર્ણ્યતામ્ ॥ ૧૪॥

હ્રીઙ્કારત્રયસમ્પુટેન મનુનોપાસ્યે ત્રયીમૌલિભિ-
ર્વાક્યૈર્લક્ષ્યતનો તવ સ્તુતિવિધૌ કો વા ક્ષમેતામ્બિકે ।
સલ્લાપાઃ સ્તુતયઃ પ્રદક્ષિણશતં સઞ્ચાર એવાસ્તુ તે
સંવેશો નમસઃ સહસ્રમખિલં ત્વત્પ્રીતયે કલ્પતામ્ ॥ ૧૫॥

શ્રીમન્ત્રાક્ષરમાલયા ગિરિસુતાં યઃ પૂજયેચ્ચેતસા
સન્ધ્યાસુ પ્રતિવાસરં સુનિયતસ્તસ્યામલં સ્યાન્મનઃ ।
ચિત્તામ્ભોરુહમણ્ડપે ગિરિસુતા નૃત્તં વિધત્તેરસા-
દ્વાણી વક્ત્રસરોરુહે જલધિજા ગેહે જગન્મઙ્ગલા ॥ ૧૬॥

ઇતિ ગિરિવરપુત્રીપાદરાજીવભૂષા
ભુવનમમલયન્તી સૂક્તિસૌરભ્યસારૈઃ ।
શિવપદમકરન્દસ્યન્દિનીયં નિબદ્ધા
મદયતુ કવિભૃઙ્ગાન્માતૃકાપુષ્પમાલા ॥ ૧૭॥

ઇતિ શ્રીમચ્છઙ્કરભગવત્પાદવિરચિતઃ
મન્ત્રમાતૃકાપુષ્પમાલાસ્તવઃ સમ્પૂર્ણઃ ॥

Encoded by V. Gopalakrishnan visgop at gmail.com, Aravind Krishnan
Proofread by V. Gopalakrishnan visgop at gmail.com,
Sridhar Seshagiri seshagir at engineering.sdsu.edu

*Mantra Matrika Pushpamala Stavah*
pdf was typeset on December 27, 2022

Please send corrections to *sanskrit@cheerful.com*